International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 13-20
© 2024 IJSR
www.anantaajournal.com
Received: 16-05-2024
Accepted: 19-06-2024

अभिषेकपाण्डेयः
शोधच्छात्रः संस्कृतविभागः,
दिल्ली विश्वविद्यालय, भारत।

**Corresponding Author:**
अभिषेकपाण्डेयः
शोधच्छात्रः संस्कृतविभागः,
दिल्ली विश्वविद्यालय, भारत।

# वेद संज्ञा विचारः

अभिषेकपाण्डेयः

**प्रस्तावना**

सृष्टेः सर्जनक्रमे परमेश्वरेण नामरूपोभयात्मकसृष्टेः रचनं कृतम्। नामात्मिका सृष्टिस्तावत् चत्वारो वेदाः रूपात्मिका सृष्टिश्चेदं चराचरं जगत् इत्थं सृष्टेरादौ द्वैविध्येन जगत् ससर्ज भगवान्। नामात्मिका सृष्टिरूपेण चत्वारो वेदाः शब्दसमूहात्मकाः सन्ति तथा चेयं रूपात्मिका सृष्टिः चराचरं जगत् । चक्षुषः रूपगुणत्वात् दृष्टिरूपा इयं सृष्टिः रूपात्मिका सृष्टिः आख्याता । येषां हृदि चतुर्णां वेदानां प्रकाशोऽभवत् ते क्रमशः अग्निवाय्वादित्याङ्गिरसः ऋषयः सन्ति । एतेषाम् ऋषीणां ज्ञानगुहायां चतुर्णां वेदानां ज्ञानं परमेश्वरेण प्रेरणारूपेण प्रकाशितम्। वस्तुतस्तु वेदशब्दस्य प्रसिद्धिः लौकिकस्य पारलौकिकस्य च ज्ञानस्य साधनरूपेणास्ति । पाणिनीयधातुपाठानुसारं चतुर्भ्यः धातुभ्यः पुनरयं वेदशब्दः घञि कृते सिद्ध्यति । १.विद्लृ लाभे[1] २.विद विचारणे[2] ३.विद सत्तायाम्[3] ४. विद ज्ञाने[4] । एतेभ्यः धातुभ्यः निष्पद्यमानोऽयं वेदशब्दः अनेकानर्थानभिदधाति । विद्लृ लाभे इत्यस्माद्धातोः वेदशब्दसिद्धौ सति अर्थः - येन आत्यन्तिकं सुखमर्थात् मोक्षादिकं प्राप्यते स वेदः, विद विचारणे धातोः निष्पद्यमानेऽर्थः भवति –

येन ज्ञानेन जगतः परमेश्वरस्य मोक्षादीनां च रहस्यानां विचारणा भवति स वेद इति कथ्यते, विद सत्तायाम् द्वारा निष्पादिते सति अर्थः येन मोक्षः अस्ति पुनर्जन्म अस्ति ईश्वरः अस्ति इत्थम्प्रकारकं सत्तात्मकं ज्ञानं भवति स वेद इति उच्यते। विद ज्ञाने इत्यस्माच्च धातोः रूपसिद्धौ अयमर्थ उपलभ्यते यत् तृणात् आरभ्य पृथिवीसूर्यद्युलोकपर्यन्तानां सर्वेषामर्थानां ज्ञापको यस्स वेदः अथवा इदमपि वक्तुं शक्यते यत् येन ज्ञानस्य पूर्णता स्यात् अज्ञानस्य च विनाशो भवेत् तज्ज्ञानं वेदनाम्नाभिधीयते । एतेभ्यः धातुभ्यः वेदशब्दः घञि कृते सिद्ध्यति। तत्र घनः अर्थाः भावकर्मकरणानि सन्ति । विद ज्ञाने धातोः भावे घञि कृते ज्ञानं, कर्मणि ज्ञेयः पदार्थः करणे ज्ञानस्य साधनम्, एतावान् विस्तृतार्थकः वेदशब्दः एवम् अन्यार्थेभ्योऽपि धातुभ्यः भावकर्मकरणेषु घञि कृते सति वेदशब्दस्य आनन्त्यं सर्वश्रेष्ठज्ञानप्रकाशकत्वञ्च सिद्ध्यति ।

वेदशब्दः वैदिके लौकिके च साहित्ये वेदचतुष्टय्यां रूढो वर्तते। अपि च पाणिनीयव्याकरणानुसारं चतुर्भ्यः धातुभ्यः धञ् प्रत्ययेन निष्पन्नत्वात् यौगिकोऽपि वर्तते। तस्मादयं वेदशब्दः योगरूढः वर्तते इति शक्येत् वक्तुम् ।

साक्षाद्वेदे वेदशब्देन ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः[34] इत्येवं चत्वारो वेदा एव गृहयन्ते। अपौरुषेयज्ञानरूपेण पुनरेषा वेदचतुष्टयी एव वेदैरपि स्वीकृता। ब्राह्मणेषु उपनिषत्सु किमु सम्पूर्णे वैदिकवाङ्मये वेदशब्दकथनमात्रेण चतुर्णां वेदानामेव ग्रहणं वर्तते, सत्यञ्चेदम्। तथा चात्र प्रमाणानि –

ओम् तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत[5] ।।

अयं मन्त्रः ऋग्वेदे यजुर्वेदे च समानरूपेण प्राप्यते। अस्मिन्मन्त्रे नामोच्चारणपूर्वकम् एते चत्वारो वेदा एव वेदसंज्ञया समलङ्कृता सन्तीति निश्चेतुं शक्यम् । अथर्ववेदेऽपि अयमेव मन्त्रः किञ्चित्परिवर्तनेन प्राप्यते –

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दो ह जज्ञिरे तस्माद्यजुस्तस्मादजायत[6]।।

पुनश्चापि अथर्ववेदे एव एकमपरं प्रमाणं प्राप्यते –

यस्मादृचो अपातक्षन्यजुर्यस्मादपाकषन्।
सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम्[7]।।

वेदेष्वेव न हि अपितु अन्यस्मिन्नपि वैदिकवाङ्मये उपनिषदादौ प्रमाणानि प्रष्टुं शक्यन्ते । तद्यथा छान्दोग्योपनिषदि नारदेन स्वसम्पूर्णज्ञातविषयवर्णने वेदानां ज्ञातत्वस्य चर्चा कृता । । तत्र स्पष्टतया सिद्ध्यति यत् चत्वारो एव वेदाः नातोऽतिरिक्ताः । प्रमाणम् -
ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्[8] ।।
तथा च बृहदारण्यकोपनिषदि उक्तं याज्ञवल्क्यमैत्रेय्योः संवादावसरे -
एवं वाऽरे अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः[9] ।

मुण्डकोपनिषद्यप्युक्तम्
तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः[10]।......
अपि च व्याकरणमहाभाष्यस्य पस्पशाह्निके अस्यप्रयुक्त इत्यस्मिन्प्रकरणे वेदानां चतुष्ट्वं कथितम्–

चत्वारो वेदाः साङ्गाः सरहस्याः बहुधा भिन्नाः एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदःइति ......[11] ।

पुराणादिष्वपि

ऋचो यजूंषि सामानि छन्दांस्याथर्वणानि च।
चत्वारस्त्वखिला वेदा सरहस्यास्सविस्तरा[12] ||
यो विद्याच्चतुरो वेदान्[13]।। ......

निरुक्ते चत्वारि शृङ्गा इति मन्त्रस्य व्याख्यावसरे उक्तं यास्कमुनिना –
चत्वारि शृङ्गा वेदा वा एते उक्ता[14]। :
महाभारतेऽपि ऋग्वेदः सामवेदश्च -यजुर्वेदोऽप्यथर्वणः[15] ।
वैदैश्चतुर्भिः सुप्रीताः[16] ।..
मनुस्मृतौ अपि अयं विषयः उपस्थापितः महर्षिणा मनुना । तत्र को नाम वेद इति जिज्ञासिते उत्तरयति – .

श्रुतिस्तु वेदो विज्ञेयः[17] तु शब्दः निश्चयार्थे श्रुतिरेव वेदः । का नाम श्रुतिः? श्रवणात् श्रुतिरिति । श्रुतिः शब्देन वेदा एव कथमभिहिताः? अनेन शब्देन वेदचतुष्टय्या एव अभिधानं कथम्? अत्र एषा जिज्ञासा उपस्थिता भवति । तदुत्तरार्थं प्राचीनकालीने आर्यावर्ते दृष्टिपातः करणीयः भविष्यति यदाहि छात्राः वेदानधिजगिरे अध्यापकाश्च शिष्यान् विना पुस्तकं उच्चारणश्रवणव्यापारेण वेदान् अध्यापयाञ्चक्रुः। प्राचीने काले वेदा एव श्रवणपरम्परया अपठ्यन्त अतः श्रुतिशब्दः वेदानामेवाभिधानं न ब्राह्मणादीनाम् । ब्राह्मणानां लयछन्दोबद्धाभावात् तेषामध्ययनमपि श्रवणमात्रेण उच्चारणमात्रेण वा न भवितुमर्हति। यद्वस्तुजातं लयबद्धं छन्दोबद्धञ्च भवति तन्मनुष्यैः स्वभावात् एव श्रुत्वा अधिगम्यते यद्वस्तु नैवं भवति तन्नाधिगन्तुं शक्नोति क्षिप्रं मनुष्यः अतः श्रुतिशब्देन वाच्याः वेदा एव न ब्राह्मणानि तथा च वेदानां संख्या चतुरेव इति पुष्कलैः प्रमाणैरयं विषयः उपस्थापितः सुनिश्चितश्च ।

भागवतादिषु पुराणेषु अर्वाचीनैः विचारकैः इतिहासः पुराणं च पञ्चमो वेद इति उच्यते अस्मिन्विषये पूर्वपक्षसाधकं प्रमाणम्भागवतात् उद्धृत्य दीयते -

इतिहासपुराणं च पञ्चमो वेद उच्यते[18]।

तत्र वेदव्यासेन 'जयो नामेतिहासः' इति वाक्यमुक्तम् अतः महाभारत इतिहास इति निश्चीयते, पुराणानि च प्रसिद्धानि भागवतादीनि वर्तन्ते। एतेषां भागवतपुराणे पञ्चमो वेद इति वाक्येन वेदसंज्ञा विहिता। यदि एते वेदा इति मन्मते तदा दोषो भवति यतोहि उक्तमस्ति वेदाः प्रमाणम्। भारतीये जनमानसे वेदान्प्रति आन्तरिकी श्रद्धा भवति अतः ये ग्रन्थाः वेदनाम्ना विद्वद्भिः कथ्यन्ते तान् ग्रन्थान् भारतीयाः परमप्रमाणरूपेण स्वीकुर्वन्ति । यदि महाभारतं पुराणं च वेदं स्वीकुर्मः तर्हि भारतीयायाः संस्कृतेः विनाशः सुनिश्चितः। यतोहि महाभारते पुराणे च तथाभूता अपि भागाः सन्ति ये प्रक्षिप्तांशा उच्यन्ते तथा च ते अनाप्तैः पुरुषैः उक्ताः सन्तीति गम्यते। ततो वेद विरुद्धत्वात् तेषां प्रमाणं न कदाचिदपि स्वीकर्तुं शक्यते । अतो वेदशब्देन वेदानामेव ग्रहणात् ते च ऋग्वेदादिभिः नामभिः प्रसिद्धा अतः इतिहासपुराणानां पुनः वेदसंज्ञा नास्ति स्वीकृता लोके। ये च ब्राह्मणानां वेदसंज्ञा अस्ति न वा अस्मिन्प्रकरणे ये हेतवः तेऽत्रापि तथैव आकाङ्क्षयितव्याः ।

वेदसंज्ञायां तु सर्वेऽपि वैदिकाः प्राचीनाः अर्वाचीनाः विपश्चितः वेद चतुष्टय्या एव ग्रहणं कुर्वन्ति परन्तु कात्यायनमुनिः स्वप्रतिज्ञापरिशिष्टे मन्त्रब्राह्मणयोर्वेदना-मधेयम् इति परिभाषां रचितवान् आपस्तम्बश्रौतसूत्र चापि वाक्यमिदं दृश्यते। तथा च सर्वेषु समुपलभ्यमानेषु कृष्णयजुषः श्रौतसूत्रेषु अपि परिभाषाप्रकरणे एषा परिभाषा दृश्यते। येन विचिकित्सा भवति यत् वेदसंज्ञया चत्वारो वेदा एव स्वीकर्तव्याः ब्राह्मणान्यपि वा। एतं सन्देहमपाकुर्वन् कात्यायनस्य च उक्तेः प्रक्षिप्ततां ज्ञापयन् महर्षिः दयानन्दः आत्मकृतायाम् ऋग्वेदादिभाष्यभूमिकायां ब्राह्मणानि वेदसंज्ञत्वं नार्हन्ति इति सिद्धये प्रधानत्वेन पञ्च हेतवो ददाति। ते च पञ्च हेतवः -

1. ब्राह्मणानां पुराणेतिहाससंज्ञत्वात्।
2. ब्राह्मणानां वेदव्याख्यात्मकत्वात्।
3. ब्राह्मणानाम् ऋषिभिरुक्तत्वात्।
4. कात्यायनभिन्नैर्ऋषिभिः वेदसंज्ञायामस्वीकृतत्वात्।
5. लौकिकेतिहाससद्भावात् ब्राह्मणेषु न तथा मन्त्रेषु।

अत्र सर्वस्मात् प्राक् एषा शङ्का उत्पद्यते यत् ब्राह्मणं किं भवति? किं नाम ब्राह्मणम्? कस्येयं ब्राह्मणसंज्ञा? एवं सति अस्य शब्दस्य प्रकृतिप्रत्ययौ ऊह्यौ। तत्र ब्रह्मन् शब्दात् अण् प्रत्यये कृते सिद्ध्यति अयं ब्राह्मणशब्दः। अस्य कोऽर्थः? ब्रह्मणः व्याख्यानानि ब्राह्मणानि इति । अत्र तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः इति पाणिनीय सूत्रेण व्याख्यातव्य नामवाचिभ्यः प्रातिपदिकेभ्यः व्याख्यानेऽभिधेये अण् प्रत्ययो भवति। ब्रह्मणा परमेश्वरेण सृष्टत्वात् ब्राह्मणो वेदस्य च कार्यकारणभावसम्बन्धात् वेदः ब्रह्मशब्दस्य वाच्यार्थः अस्ति । अस्मिन्विषये कानिचित्प्रमाणानि अपि दीयन्ते -तद्यथा -

वेदो ब्रह्म,[19] ब्रह्म वै मन्त्रः[20] इति ।

इत्येताभ्यां प्रमाणाभ्यां वेदानां ब्रह्म इति संज्ञा स्वीकृता। अतस्तेषां वेदानां व्याख्यानानि ब्राह्मणानि इति सर्वैः विद्वद्भिः स्वीक्रियते तस्मात् वेदानाम् अर्थप्रकाशकाः तेषाम् अभिप्रायविस्तारकाः ब्राह्मणग्रन्थाः वेदस्य व्याख्यानग्रन्था एव। महर्षिः दयानन्दः ब्राह्मणशब्दस्य व्युत्पत्तिः ऋग्वेदादिभाष्यभूमिकायां कृतवान्, सा निम्नलिखिताऽस्ति–
चतुर्वेदविद्भिः ब्रह्मभिः ब्राह्मणैः महर्षिभिः प्रोक्तानि - । वेदव्याख्यानानि तानि ब्राह्मणानि
महर्षिः दयानन्दः ब्रह्मशब्देन ब्राह्मणस्य ग्रहणं करोति । अत्र विषये ब्राह्मणादिग्रन्थानां प्रमाणं दातुं शक्यते तद्यथा -

ब्रह्म वै ब्राह्मणः क्षत्रं राजन्यः[21] ।।

समानार्थवेतौ वृषशब्दो वृषन्शब्दश्च ब्रह्मशब्दो ब्राह्मणशब्दश्च[22] । इति

इत्थं वेदज्ञैः विद्वद्भिः कृतानि वेदेव्याख्यानानि ब्राह्मणानि । अत्र व्युत्पत्तिशरीरमित्थं भवति ब्रह्मभिः अर्थात् ब्राह्मणैः व्याख्यातानि ब्राह्मणानि। एवम्प्रकारेण तैत्तरीयसंहितायाः भाष्यभूमिकायां सायणाचार्येण दत्तमुद्धरणं स्थापयितुं शक्यते -
यद्यपि मन्त्रब्राह्मणात्मको वेदस्तथापि मन्त्रव्याख्यानरूप-त्वात् मन्त्राः एवादौ समाम्नाताः।
अत्र ध्यातव्यं वस्तु अस्ति यत् ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात् अर्थात् ब्राह्मणानि मन्त्राणां व्याख्यानस्वरूपाणि सन्ति। इत्थं ब्रह्मशब्देन वेदानां वेदमन्त्राणां च ग्रहणं कृतमस्ति सर्वैः विपश्चिद्भिः। अत्र महर्षिः दयानन्दः शतपथब्राह्मणस्य व्याकरणमहाभाष्यस्य च

उद्धरणम् उपस्थाप्य ब्रह्मणा अर्थात् ब्राह्मणैः ऋषिभिः शुच्याचारैः प्राचीनैः महर्षिभिः निर्मापितानि रचितानि वेदव्याख्यानानि एवं ब्राह्मणानि इति मतं साधयति। एवमेव बृहत्पराशरस्मृतावपि ब्राह्मणानां लक्षणं कृतमस्ति तद्यथा –

अस्य मन्त्रस्यार्थोऽयमयं मन्त्रोऽत्र वर्तते ।
तत्तस्य ब्राह्मणं ज्ञेयं मन्त्रस्येति श्रुतिक्रमः[23]॥ इति

अस्य मन्त्रस्य अयम् अर्थोऽस्ति अर्थात् अस्य मन्त्रस्य इदम्प्रयोजनम् अथवा अयं मन्त्रः अत्र वर्तते इत्येवं ज्ञापकान् ग्रन्थान् मन्त्रसंहितायाः वेदानां ब्राह्मणं मन्वीध्वम् एवम् अन्यान्यपि प्रमाणानि प्राप्यन्ते -

तत्र शतपथब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात् व्याख्येयमन्त्रप्रतिपादकसंहिताग्रन्थः पूर्वभावित्वात्प्रथमो भवति।
वाक्यमिदं सायणाचार्येण काण्वसंहितायाः भूमिकायां लिखितम्। अस्यार्थः- शतपथब्राह्मणं मन्त्राणां व्याख्यानरूपमस्ति। तेषां प्रतिपादकः संहिताग्रन्थः प्रथमः पृथक् च अस्ति । ब्राह्मणग्रन्थाः वेदव्याख्यानानि सन्त्यत्र तेषामेव प्रमाणं ग्रहीतुं योग्यमस्ति तद्यथा ब्राह्मणेष्वेवोक्तम्.- नात्र तिरोहितमिवास्ति ब्राह्मणेषु वाक्यस्यास्य अनेकशः प्रयोगो दृश्यते अस्यार्थः - मन्त्रस्य यावान् भागः जटिलः आसीत् सः प्रकाशितः, शिष्टः स्पष्टः। अनेकेषु स्थानेषु आगतानि वाक्यानि तदुहैके, तद्धैके, तद्धैकेषाम् अत्र हैके, इमामु हैके, व्याख्यायते आदीनि सन्ति। एतेषां पदानाम्प्रयोगः ब्राह्मणग्रन्थानां वेदव्याख्यानग्रन्थत्वम्साधयति। तथा च ब्राह्मणग्रन्थेषु इषे त्वोर्जे त्वेति प्रकारकं वेदमन्त्रप्रतीकं संस्थाप्य तेषां व्याख्या कृतास्ति एतेन स्पष्टं यत् वेदमन्त्राः व्याख्येयाः ब्राह्मणग्रन्थाश्च तेषां व्याख्यानानि सन्ति। तत्र प्रथमहेतोः व्याख्यानम्-
प्रथमो हेतुस्तावत् ब्राह्मणानां पुराणेतिहाससंज्ञत्वात् अर्थात् ब्राह्मणानि पुराणेतिहाससंज्ञकाः तस्माद्ब्राह्मणानां वेदसंज्ञा नास्ति। अत्र तैत्तरीयारण्यकस्य वाक्यमिदम्प्रमाणम् ब्राह्मणानीतिहासान्पुराणानि कल्पान् गाथा नाराशंसीरिति। आश्वलायने गृह्यसूत्रे चोक्तम्- ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीति। इत्थं ब्राह्मणानां इतिहासः, पुराणं, कल्पः, गाथा नाराशंस्यादयः संज्ञा सन्ति। तत्र प्रथमः इतिहासः–

(अ) इतिहासः– इति होचुरित्यनिर्दिष्ट प्रवक्तृकं प्रवादपारम्पर्यमैतिट्ह्यम् । इति महर्षिः दयानन्दः। अर्थात् न निर्दिष्टः प्रवक्ता यस्य तत् अनिर्दिष्ट प्रवक्तृकं वाक्यं प्रवादानाञ्च पारम्पारर्थं इति ह ऊचुः इति वाक्योपनिबद्ध यत्तदैतिह्यम् । इत्थम्भूतानां वाक्यानां ब्राह्मणभागेषु दृश्यमानत्वात् ब्राह्मणस्य इतिहास इति संज्ञा सुष्टूक्ता। यथा - ब्राह्मणभागेषु उर्वशीपुरुरवसोः संवादः उर्वशीहाप्सराः इत्यादि निर्दिष्टः, देवासुरसंग्रामादयश्च इतिहासाः आप्नुवन्ति अतः एवम्भूता केचित् ब्राह्मणभागा एव इतिहासाः इति स्पष्टमनेन उदाहरणेन ।

(ब) पुराणम् - पुराणस्य पञ्चलक्षणानि दीयते तद्यथा -

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणम्पञ्चलक्षणम् ।।

अत्र सर्वेषाम् उदाहरणस्यानुपलब्धत्वात् वंशस्यैव उदाहरणं दीयते । सामविधान ब्राह्मणे १।९।३ वंशस्योल्लेखः प्राप्यते - १.प्रजापतिः २.बृहस्पतिः ३.नारदः ४.विष्वक्सेनः ५.व्यासः ६.पाराशर्यः ७.जैमिनिः ८.पौष्पिञ्जयः ९.पाराशर्यायणः १०.बादरायणः ११.ताण्डिः १२.शाट्यायानिः ।
अपि च - जगतः पूर्वावस्थाकथनपूर्वकाणि वचनानि पुराणानि इति महर्षिः दयानन्दः । अर्थात् जगतः प्रारम्भिक्याः अवस्थायाः वर्णनं यस्मिन् ब्राह्मणभागे प्राप्यते स पुराणमित्याख्यायते यथा –

सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम्[24] ।

आपो ह वा इदमग्रे सलिलमेवास[25] ।

आत्मा वा इदमेकमेवाग्र आसीन्नान्यत् किञ्चनमिषत[26] ।

इदं वा अग्रे चैव किञ्चिदासीत्[27]।

अत्रोपनिषदां ब्रह्मणेष्वेवान्तर्भावात् तेषामपि उद्धरणानि दत्तानि ।
(स) कल्पाः– मन्त्रार्थसामर्थ्यप्रकाशका कल्पाः। इति ऋग्वेदादिभाष्यभूमिकायां महर्षिणा उक्तम्। अर्थात् मन्त्राणाम् अर्थस्य विस्तारकाः ब्राह्मणभागाः कल्पनाम्ना अभिधीयन्ते । यथा-

वृष्ट्यै तदाह यदाहेषे त्वोर्जे त्वेति [28]।
कश्यपो वै कूर्मः। प्राणो वै कूर्मः [29]।
अथर्वाङ्गिरसो गोप्तारः [30]।
अथर्वाङ्गिरसोभिश्च गुप्तो यज्ञश्चतुष्पाद् दिवमारुरोह [31]।

(द) गाथाः – संवादरूपाः

याज्ञवल्क्यजनकादीनां संवादः गार्गीमैत्रेय्योः संवादः। अपि वा गाथाः आत्मवादश्लोकाः इति गाथाविषयमधिकृत्य याज्ञवल्क्य स्मृतिटीकाकारैः आचार्यविश्वरूपैः १/४५ उक्तम्।
(ए) नाराशंसीः - नराः अस्मिन्नासीनाः शंसन्ति। नरैः प्रशस्यो प्रवति [32]।
महर्षि दयानन्देन कृतमस्य यास्कीयवाक्यस्य भाष्यम्- नृणां यत्र प्रशंसा नृभिर्यत्र प्रशस्यते ता ब्राह्मणनिरुक्ताद्यन्तर्गताः कथा नाराशंस्यो ग्राह्या नाते अन्याः इति। नाराशंस्यामर्थवादस्यान्तर्भावो भवति यथा तत्र स्तुत्यादयः अर्थवादस्य भागाः सन्ति तथैव अत्रापि, नराणां प्रशंसा यत्र - यस्मिन्ब्राह्मणभागे क्रिया स भागः नाराशंसी इति कथ्यते। यथा- सर्वजिता वै देवा सर्वमजयन् इति वाक्यानि नाराशंस्यः कथ्यन्ते। एवं ब्राह्मण ग्रन्थेषु समाविष्टा देवासुरसंग्रामादयः कथाः इतिहासपदेन व्यवह्रियन्ते, जगतः उत्पत्यादिवर्णनात्मकः ब्राह्मणभागः पुराणं, वेदमन्त्राणाम् अर्थनिरूपणाद् कल्पाः, दृष्टान्तदार्ष्टान्तरूपेण कथितम् कथाप्रसङ्गाः याज्ञवल्क्यमैत्रेयीजनकादीनाञ्च प्रश्नोत्तररूपाणां कथानां नाम गाथा इति भवति। यस्मिन्भागे ईश्वरधर्मपदार्थ विद्यानां मनुष्याणां च प्रशंसा भवति स भागः नाराशंसी।
२. ब्राह्मणानां वेदसंज्ञा नास्तीत्यस्मिन् सिद्धान्ते द्वितीयः हेतुः महर्षिणा दयानन्देनोक्तः वेदव्याख्यानरूपत्वात् ब्राह्मणाः वेदानां व्याख्यानग्रन्थाः अस्माद्धेतोरपि ब्राह्मणानां वेदसंज्ञा अस्वीकार्या। यो ग्रन्थः यस्य ग्रन्थस्य व्याख्यान ग्रन्थो भवति तन्नाम्ना न स कदापि अभिधीयते। यथा व्याकरणमहाभाष्यम् अष्टाध्याय्याः व्याख्यानग्रन्थः न कदापि अष्टाध्यायीनाम्ना अभिधीयते। यश्च यस्य व्याख्यानग्रन्थो भवति तत्र मूलग्रन्थस्य प्रतीकपूर्वात् व्याख्यानं भवति यथा ब्राह्मणे इषे त्वोर्जे त्वेति इति प्रतीकग्रहणपुरस्सरं व्याख्या कृताऽस्ति उक्तं च भट्ट भास्करेण–

**ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यानग्रन्थः ।।**

यदि ब्राह्मणानि वेदानां व्याख्यानानि नाभविष्यन् कथं तर्हि वेदमन्त्राणां प्रतीकमस्थापयिष्यन् नैते स्वतन्त्राः ग्रन्थाः अपितु प्रतीकस्थापनत्वात्मन्त्राणां व्याख्यानग्रन्थाः। न वेदेषु ब्राह्मणवचनानां प्रतीकं दत्तमतः ब्राह्मणानि ईश्वरोक्तानां मूलसंहितानां ऋग्वेदयजुर्वेद– सामवेदाथर्ववेदेत्याख्यानां व्याख्यानानि एव प्रतीयन्ते अतः हेतोः ब्राह्मणानां वेदसंज्ञायामधिकारो नास्त्येवेति दृढम्।
३. ब्राह्मणानां वेदसंज्ञा नास्ति इत्येतस्मिन्दर्शने अत्र तृतीयो हेतुः - ऋषिभिरुक्तत्वात्। अर्थात् ईश्वरभिन्नैः कतिपयैः ऋषिभिरुक्तत्वात् मनुष्यबुद्धिरचितत्वाच्च ब्राह्मणा न वेदसंज्ञकाः। ब्राह्मणानां नामग्रहणमात्रेणैव तेषाम् ऋषिभिरुक्तत्वं संघटते। यथा ऐतरेयऋषिणा ऐतरेय–ब्राह्मणमुक्तं तथा तैत्तरीयऋषिणा तैत्तरीयम्। यत्र नाभिधानतः ज्ञायते तत्र प्राचीनानां विपश्चितां ग्रन्याध्ययनमात्रेणैव ब्राह्मणानां कर्तुर्नाम प्रकाशते यथा शतपथ ब्राह्मणस्य प्रवक्ता महर्षिः याज्ञवल्क्यः अस्तीति गम्यते। ईश्वरादन्ये मानवाः मानवश्रेण्यामागच्छन्ति। मनुष्यश्च एकदेशी अल्पज्ञः अल्पशक्ति सामर्थ्यवान् भवति। तद्द्वारा व्याख्यातः ग्रन्थोऽपि मनुष्यबुद्धिरचितत्वात् मनुष्याणामेव कृते सुविधाजनको भविष्यति। अतः ब्राह्मणेषु यत्र तत्र पशुबलिआदीनां वर्णनं प्राप्यते तच्च वेदविरुद्धत्वादप्रमाणम्। ईश्वरेण निःश्वसिता चत्वारो वेदाः ईश्वरस्य सर्वज्ञतायाः सर्वशक्तिमत्त्वस्य सर्वव्यापकतायाश्च प्रमाणानि सन्ति। आचार्यशंकरेणोक्तञ्च-
ऋग्वेदादेः शास्त्रस्यानेकविधास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म [33]।
प्रत्येक ग्रन्थकारस्य कृतौ देशजातिकालानां चिह्नमवश्यमेव भवति परम् ईश्वरः सृष्ट्यादौ देशजातिकालानवच्छिन्नो भूत्वा निःश्वासवत् नामात्मकरूपात्मकं जगत् स्वाभाविक्या ज्ञानबलक्रियया उत्पादयति। अतः वेदसंज्ञान्तर्गतं ब्रह्मणा नामाधिकारो नास्त्येव।

४.कात्यायनभिन्नैर्ऋषिभिः ब्राह्मणानां वेदसंज्ञायामस्वी-कृत्वात् ब्राह्मणग्रन्थानां वेदसंज्ञा नैव प्राप्यते। आपस्तम्ब श्रौतसूत्रे २४/१/३१ कात्यायनमुनेः प्रतिज्ञापरिशिष्टे १।१। तथा च अद्यत्वे सर्वेष्वेव उपलभ्यमानेषु कृष्णयजुर्वेदेषु श्रौतसूत्रेषु परिभाषा प्रकरणे मन्त्रब्राह्मणयोर्वेदनामधेयम् इत्येषा परिभाषा लिखिताऽस्ति। अन्यैरपि प्रामाणिकैः विद्वद्भिः ब्राह्मणानि वेदसंज्ञायां स्वीक्रियन्ते। यथा –

I. मन्त्राश्च ब्राह्मणञ्च वेदः इति शबरस्वामी।

II. वेदसंहिता ब्राह्मणमित्यर्थः इति याज्ञवल्क्यस्मृतौ बालक्रीडायां टीकायामाचार्यो विश्वरूपः।

III. मन्त्रब्राह्मणात्मको वेदः इति सायाणाचार्यः तैत्तरीयभाष्यारम्भे

Iv. वेदशब्देनऋग्यजुः सामानि ब्राह्मणसंहितान्युच्यन्ते इति मेधातिथिः नैतत्कथनमात्रेण ब्राह्मणानि वेदाः सञ्जाताः। अस्य केवलमयमर्थः यत् तेष्वेव विशिष्टेषु ग्रन्थेषुः एतन्मतं न सर्वत्र यतोहि अन्यैः विद्वद्भिः ब्राह्मणानि वेदसंज्ञायां न हि स्वीकृतानि। कात्यायनाचार्यस्य एतत्परिभाषानिर्माणमेव प्रकटयति यत् अस्मात्प्राक् ब्राह्मणग्रन्थानां गणना वेदेषु नासीत्। तैः संक्षेपीकरणाय येन पुनः-पुनः पृथक्-पृथगुभयारुच्चारणं न कर्तव्यं स्यात् इति हेतोः स्वग्रन्थार्थम् एषा परिभाषा विरचिता। यदि ब्राह्मणानि वेदाश्च एके एव स्युः तर्हि एषा परिभाषा कस्य परिज्ञानाय विरचिता यदि स्वतः एव ब्राह्मणानि वेदसंज्ञकाः तर्हि एषा परिभाषा व्यर्था सिद्धा भवति। यथा- न स्त्री पुरुषः अतः ब्राह्मणेषु एषा परिभाषा कृता यत् यत्र-यत्र पुरुषस्योल्लेखः तत्र-तत्र स्त्रिया अपि पुरुषग्रहणेन ग्रहणं स्यात् तथैव संक्षेपहेतोः कात्यायनस्य ग्रन्थे आपस्तम्बश्रौतसूत्रे कृष्णयजुषश्च श्रौतसूत्रेषु यत्र-यत्र वेदशब्दोल्लेखः स्यात् तत्र-तत्र वेदशब्देन मन्त्राणां ब्राह्मणानां च ग्रहणं भवेदिति अस्याः परिभाषायाः रचने प्रयोजनमस्ति।

प्रायेण वेदशब्दः शास्त्रमात्राय प्रयुक्तो भवति यथा - धनुर्वेदः, गन्धर्ववेदः इति। परन्तु न स वेदः। वेद इति ज्ञानस्य नाम, यदा वेदशब्दो यौगिको गृह्यते तदा शास्त्रमात्रस्य ग्राहको भवति यदा च योगरुढि मन्यते तदा वेदचतुष्टय्यामेव प्रयुक्तो भवति। ब्राह्मणानामान्तरिकैः, प्रमाणैः अपि ब्राह्मणानां न तस्मिन्नर्थे वेदसंज्ञायां ग्रहणं यस्मिन् ऋग्वेदादीनामपौरुषेयाणां ग्रहणमस्ति। तदेवं यदि एकसहस्रपुस्तकेष्वपि वेदाः ब्राह्मणानि चाभिन्नानि इति मतं स्यात् तदापि एतदेव वक्ष्यते यदेष उल्लेख: तदर्थमेवास्ति। प्रत्येकं ग्रन्थकर्तुः परिभाषायाः रचनेऽधिकारः परन्तु तेन वेदस्य वास्तविके अर्थे अभेद एव। केचिज्जनाः अनन्ता वै वेदाः इत्यादिभिः अनेकैः भ्रान्तैः प्रमाणैः वेदानां ब्राह्मणानां चाभिन्नत्वं साधयन्ति। तैः नैतदवगम्यते यदनेन ब्राह्मणानां गौरवं नैव वर्धते अपितु वेदानां लाघवमवश्यम्भवति। यतोहि ब्राह्मणानामान्तरिकैः प्रमाणैः एव सर्वे पक्षाः अपास्ताः। तानि प्रमाणानि–

एवं वाऽरे अस्य महतो भूतस्य निःश्वसितमेतद्यद्दृग्वेदो यजुर्वेदः सामवेदः अथर्ववेदः[34] एतद् ब्राह्मणवाक्यं याज्ञवल्क्यमैत्रेय्योः संवादसमये प्राप्यते। अन्यान्यपि प्रमाणानि–

तानि ज्योतींष्यभ्यपतत् तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त[35] अस्मिन्वाक्ये त्रयो वेदा इति पदेन सन्देहो भवति यत् वेदा त्रयो वा चत्वारो वेति ? अत्र उत्तरं दीयते - मन्त्राणां त्रिप्रकारकत्वात् वेदाः अपि त्रय इति कै: चित् मन्यते। तत्र गद्य प्रधानो मन्त्रः वेदः यजुः पद्यात्मकः ऋक् गानात्मकश्च सामवेदः अथर्वागतानां मन्त्राणान्तु एतेष्वेवान्तर्भावात्त्रयो वेदा इति उच्यते नात्र सन्देहस्यावसरः। तथैव अग्रेऽपि प्रमाणम् –

अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः[36]। अत्रापि त्रयाणामेव वेदानामाख्यानात् त्रय एव वेदा इति मैवं भ्रम्यताम् अत्रापि पूर्वोक्तानुसारमेव निराकरणं योजनीयम्।

५. अस्मिन् प्रकरणे पञ्चमो हेतुस्तावत् लौकिकेतिहास सद्भावात् ब्राह्मणेषु न तथा मन्त्रेषु अर्थात् लौकिकेतिहासस्य मन्त्रभागे अभावात् ब्राह्मणेषु च तेषां सत्त्वात् ब्राह्मणानि वेदाश्च भिन्ना इति राद्धान्तः। मन्त्रभागेषु इतिहासः नैत्यिकाः सामान्याश्च सन्ति परं ब्राह्मणेषु इतिहासाः मनुष्यविशेषपराः ऋषिविशेषपराः, तेषां नामोल्लेखपुरस्सरं च ग्रहणम्। यथा- अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः मैत्रेयी च कात्यायनी च [37] अन्यमपि प्रमाणम् - तस्य ह नचिकेता नाम पुत्रो आस [38]। एवं मनुष्याणां नामोल्लेखतया ब्राह्मणेषु लौकिकेतिहासानां सत्त्वात् मन्त्रभागेषु च तेषामभावात् तेषां ब्राह्मणानां वेदसंज्ञा नास्ति स्वीकृता।

यदि वेदानां ब्राहाणाञ्च भिन्नत्वं लौकिकेतिहाससम्भवान्निश्चीयते तर्हि वेदेष्वपि लौकिकानां ऋषीणां नामोल्लेखः प्राप्यते तदा तु वेदेष्वपि इतिहासः वक्तुं शक्यते। तथाहि–

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्॥

मन्त्रेऽस्मिन् जमदग्नेः कश्यपस्य च नामनिर्देशपुरःसरं इतिहासोऽस्ति। तथा अन्येऽपि एवम्भूताः मन्त्राः येषां

निरुक्तभाष्ये यास्केनाचार्येण तत्र इतिहासमाचक्षते इति उल्लेखपूर्वकं निर्देशः कृतः अस्ति। ते चापि केचन मन्त्राः–

आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि [39] ।

अस्य भाष्यं निरुक्तेऽस्ति - तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुरित्यादि। इतोऽपि–

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः [40]।।

अस्यापि मन्त्रस्य भाष्यसमये आचार्येणोक्तम् - तत्रेतिहासमाचक्षते विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव । पूर्वस्मिन्मन्त्रे देवापिः इति अभिधानं प्रसिद्धस्य राज्ञः अस्ति। अस्मिन् मन्त्रे कुशिक इति निर्दिष्टेन पदेन विश्वामित्रस्य ऋषेः पितामहः कथ्यते । एवं सति वेदेष्वपि लौकिकः इतिहासः नामोल्लेखपूर्वकमस्ति तथा अन्या अपि संहिताः प्रमाणं भवितुमर्हन्ति तासु एकात्र अथर्ववेदतः दीयते–

विश्वामित्र जमदग्निर्वसिष्ठो भारद्वाज गोतम वामदेव ।
शर्दिर्नो अत्रिरग्रभीन्नमोभिः सुशंसारः पितरो मृडता नः[41] ।।

अस्मिन्मन्त्रे विश्वामित्रः प्रसिद्धः ऋषिः जमदग्निः वसिष्ठश्च त्रेतायुगीनः भारद्वाजगोतमवामदेवादयोऽपि वंशपरम्परायां वर्तन्ते इति एषां प्रसिद्धिः। अत्र महर्षिः दयानन्दः ऋग्वेदादिभाष्यभूमिकायाम् अस्य पूर्वपक्षस्य उत्तरं ददन् शतपथ ब्राह्मणादेः वचनमुद्धरति –

चक्षुर्वै जमदग्निऋषिर्यदेनेन जगत्पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्निः[42] ।
कश्यपो वै कूर्मः प्राणो वै कूर्मः[43]।
प्राणो वै वसिष्ठः मनो वै भारद्वाजः श्रोत्रं वै विश्वामित्रः ।
अत्रिर्न त्रय इति [44]

ब्राह्मणनिरुक्तादिशास्त्रानुसारि वेदार्थं मन्तानः महर्षिः दयानन्दः वेदस्य सर्वे शब्दा यौगिका इति सिद्धान्तं स्वीकरोति । वेदेषु रूढेः योगरूढेश्च न कापि चर्चाऽस्ति। यौगिकः शब्दः प्रकृति प्रत्यययोः सम्बन्धेन अर्थमवगमयति। निरुक्तानुसारं देवापिः न कोऽपि राजा, अपितु देवानामास्या स्तुत्या च प्रदानेन च देवापिशब्दस्य देवापित्वं सिद्धम् । तथैव कुशिक शब्दस्य ज्ञाननिष्कर्षप्राप्त इति अर्थोऽस्ति कुष निष्कर्षे इत्यस्मात् धातोः निष्पद्यमानत्वादस्य शब्दस्य । यौगिकव्युत्पत्याधारेण एते शब्दाः सामान्याः गुणवाचकाः सन्तः यो तद्गुणं बिभर्ति तदर्थं प्रयुक्तो भवति इति निश्चीयते । सर्वस्यामित्रः पापात् निवारकः पापमत्तीति कारणात् अत्रिः, वाजं बलं भरद् भरद्वाजः, प्राणविद्यां वेद यः स वसिष्ठः । एतैः गुणैः युक्तानां मानवानां कृते वेदादेव निष्कृष्य उपयुक्तानि नामानि स्थापितानि इति प्रतीयते परं वेदे तु तन्नामानाम् ऐतिहासिकानां मनुष्याणां चरित्रवर्णनं नास्ति वेदे । वस्तुतस्तु वेदादेव सर्वाः संज्ञाः लोके प्रयुक्ताः न तु लोकतः वेदे, अत्र मनूक्तम्प्रमाणम् –

सर्वेषां तु स नामानि कर्माणि च पृथक्-पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे[45] ।।

एवमन्यान्येभ्यः प्रमाणेभ्यः वेदसंज्ञायां ब्राह्मणानां नान्तर्भावः अन्येभ्योऽपि बहुभ्यः हेतुभ्यः ब्राह्मणानि न वेदसंज्ञात्वमर्हन्ति इति सर्वे पूर्वपक्षाः अपास्ताः ।। ।। इति ।।

## References


1. तुदादिगण १४१
2. रुधादिगण १३
3. दिवादिगण ६०
4. अदादिगण ५७
5. यजुर्वेद ३१७.
6. अथर्ववेद १६६.१३.
7. अथर्ववेद १०७.२०.
8. छान्दोग्योपनिषद ७१.२.
9. वृहदारण्यकोपनिषद २४.१०.
10. मुण्डकोपनिषद् १/१/५
11. महाभाष्य पस्पशा० ११/१/
12. हरिवंश पुराण
13. पद्मपुराण ५२.५०.
14. निरुक्त १३७.
15. महाभारत वनपर्व १८७ १४/
16. महाभारत द्रोण पर्व ५१ २२-
17. मनु५.१४ .
18. भागवतपुराण
19. जैमिनीयो. ४३/४/११/
20. शतपथ ब्रा .१५/१/

21. शतपथब्रा .१३१/
22. व्याकरणमहाभाष्य ५/१/१
23. बृहदारण्यकोपनिषद् ३४४/
24. छान्दोग्योपनिषद् प्रपा० ६
25. शतपथ ब्रा० १११/
26. ऐतरेयोपनिषद्१।१
27. बृहदारण्यकोपनिषद्१।२।१–
28. शतपथ ब्रा० १७/
29. शतपथ ब्रा० ७५/
30. गोपथ ब्रा० १/११३/
31. गोपथ ब्रा० १२५/५/
32. निरुक्त ८।६
33. शाङ्करभाष्य वे२।१.
34. शतपथ ब्रा० १४५.४.
35. शतपथ ब्रा० ११ ५/
36. शतपथ ब्रा० ११५.८.
37. शतपथ ब्रा० १४१/३/७/
38. तैत्तरीय ब्रा० ३१४/८/११/
39. ऋग्वेद १०।९७।५
40. ऋग्वेद १०१७.५.
41. अथर्ववेद १८३.१६.
42. शतपथ ब्रा० ८१/
43. शतपथ ब्रा० ७५/
44. निरुक्त ३ १३/
45. मनुस्मृति १२१.